॥ श्रीरुद्रत्रिशति ॥

.. shrirudratrishati ..

sanskritdocuments.org

August 12, 2016

.. shrirudratrishati ..

॥ श्रीरुद्रत्रिशति ॥

Document Information

Text title : shrirudratrishati

File name : shrirudratrishati.itx

Category : trishati

Location : doc_shiva

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/hinduism

Transliterated by : Vaidya Sundaram vaidya_narayanan at yahoo.com

Proofread by : Vaidya Sundaram vaidya_narayanan at yahoo.com, Ajit Krishnan ajit at mudgala.com

Latest update : December 12, 2004

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

August 12, 2016

sanskritdocuments.org

॥ श्रीरुद्रत्रिशति ॥

ॐ श्री गुरुभ्यो नमः । हरिः ॐ ।

॥ श्रिरुद्रनाम त्रिशति ॥

नमो हिरण्यबाहवे नमः । सेनान्ये नमः ।
दिशां च पतये नमः । नमो वृक्षेभ्यो नमः ।
हरिकेशेभ्यो नमः । पशूनां पतये नमः ।
नमः सस्पिञ्जराय नमः । त्विषीमते नमः ।
पथीनां पतये नमः । नमो बभ्लुशाय नमः ।
विव्याधिने नमः । अन्नानां पतये नमः ।
नमो हरिकेशय नमः । उपवीतिने नमः ।
पुष्टानां पतये नमः । नमो भवस्य हेत्यै नमः ।
जगतां पतये नमः । नमो रुद्राय नमः ।
आततविने नमः । क्षेत्राणां पतये नमः ।
नमः सूताय नमः । अहन्त्याय नमः ।
वनानां पतये नमः । नमो रोहिताय नमः ।
स्थपतये नमः । वृक्षाणं पतये नमः ।
नमो मन्त्रिणे नमः । वाणिजाय नमः ।
कक्षाणां पतये नमः । नमो भुवंतये नमः ।
वारिवस्कृताय नमः । ओषधीनां पतये नमः ।
नम उच्चैर्घोषाय नमः । आक्रन्दयते नमः ।
पत्तीनाम् पतये नमः । नमः कृत्स्नवीताय नमः ।
धावते नमः । सत्त्वनां पतये नमः ॥

नमः सहमानाय नमः । निव्याधिने नमः ।
आव्याधिनीनां पतये नमः । नमः ककुभाय नमः ।
निषङ्गिणे नमः । स्तेनानां पतये नमः ।
नमो निषङ्गिणे नमः । इषुधिमते नमः ।
तस्कराणां पतये नमः । नमो वञ्चते नमः ।

परिवञ्चते नमः । स्तायूनां पतये नमः ।
नमो निचेरवे नमः । परिचराय नमः ।
अरण्यानां पतये नमः । नमः सृकाविभ्यो नमः ।
जिघा ँ सद्भ्यो नमः । मुष्णतां पतये नमः ।
नमोऽसिमद्भ्यो नमः । नक्तंचरद्भ्यो नमः ।
प्रकृन्तानां पतये नमः । नम उष्णीषिने नमः ।
गिरिचराय नमः । कुलुञ्चानां पतये नमः ।
नम इषुमद्भ्यो नमः । धन्वाविभ्यश्च नमः । वो नमः ।
नम आतन्वानेभ्यो नमः। प्रतिदधानेभ्यश्च नमः । वो नमः ।
नम आयच्छद्भ्यो नमः । विसृजद्भ्यश्च नमः । वो नमः ।
नमोऽस्यद्भ्यो नमः । विध्यद्भ्यश्च नमः । वो नमः ।
नम आसीनेभ्यो नमः । शयानेभ्यश्च नमः । वो नमः ।
नमः स्वपद्भ्यो नमः । जाग्रद्भ्यश्च नमः । वो नमः ।
नमस्तिष्ठद्भ्यो नमः । धावद्भ्यश्च नमः । वो नमः ।
नमस्सभाभ्यो नमः । सभापतिभ्यश्च नमः । वो नमः ।
नमो अश्वेभ्यो नमः । अश्वपतिभ्यश्च नमः । वो नमः ।
नम आव्यधिनीभ्यो नमः । विविध्यन्तीभ्यश्च नमः । वो नमः ।
नम उगणाभ्यो नमः । तृ ँ हतीभ्यश्च नमः । वो नमः ।
नमो गृत्सेभ्यो नमः । गृत्सपतिभ्यश्च नमः । वो नमः ।
नमो व्रातेभ्यो नमः । व्रातपतिभ्यश्च नमः । वो नमः ।
नमो गणेभ्यो नमः । गणपतिभ्यश्च नमः । वो नमः ।
नमो विरूपेभ्यो नमः । विश्वरुपेभ्यश्च नमः । वो नमः ।
नमो महद्भ्यो नमः । क्षुल्लकेभ्यश्च नमः । वो नमः ।
नमो रथिभ्यो नमः । अरथेभ्यश्च नमः । वो नमः ।
नमो रथेभ्यो नमः । रथपतिभ्यश्च नमः । वो नमः ।
नमस्सेनाभ्यो नमः । सेनानिभ्यश्च नमः । वो नमः ।
नमः क्षत्तृभ्यो नमः । संग्रहीतृभ्यश्च नमः । वो नमः ।

नमस्तक्षभ्यो नमः । रथकारेभ्यश्च नमः । वो नमः ।
नमः कुलालेभ्यो नमः । कर्मारेभ्यश्च नमः । वो नमः ।
नमः पुंजिष्टेभ्यो नमः । निषादेभ्यश्च नमः । वो नमः ।
नम इषुकृद्भ्यो नमः । धन्वकृद्भ्यश्च नमः । वो नमः ।
नमो मृगयुभ्यो नमः । श्वनिभ्यश्च नमः । वो नमः ।
नमः श्वभ्यो नमः । श्वपतिभ्यश्च नमः । वो नमः

नमो भवाय च नमः । रुद्राय च नमः ।
नमश्शर्वाय च नमः । पशुपतये च नमः ।
नमो नीलग्रीवाय च नमः । शितिकण्ठाय च नमः ।
नमः कपर्दिने च नमः । व्युप्तकेशाय च नमः ।
नमस्सहस्राक्षाय च नमः । शतधन्वने च नमः ।
नमो गिरिशाय च नमः । शिपिविष्टाय च नमः ।
नमो मीढुष्टमाय च नमः । इषुमते च नमः ।
नमो ह्रस्वाय च नमः । वामनाय च नमः ।
नमो बृहते च नमः । वर्षीयसे च नमः ।
नमो वृद्धाय च नमः । संवृध्वने च नमः ।
नमो अग्रियाय च नमः । प्रथमाय च नमः ।
नम आशवे च नमः । अजिराय च नमः ।
नमः शीघ्रियाय च नमः । शीभ्याय च नमः ।
नम ऊर्म्याय च नमः । अवस्वन्याय च नमः ।
नमः स्रोतस्याय च नमः । द्वीप्याय च नमः ।
नमो ज्येष्ठाय च नमः । कनिष्ठाय च नमः ।
नमः पूर्वजाय च नमः । अपरजाय च नमः ।
नमो मध्यमाय च नमः । अपगल्भाय च नमः ।
नमो जघन्याय च नमः । बुध्नियाय च नमः ।
नमः सोभ्याय च नमः । प्रतिसर्याय च नमः ।
नमो याम्याय च नमः । क्षेम्याय च नमः ।

नम उर्वर्याय च नमः । खल्याय च नमः ।
नमः श्लोक्याय च नमः । अवसान्याय च नमः ।
नमो वन्याय च नमः । कक्ष्याय च नमः ।
नमः श्रवाय च नमः । प्रतिश्रवाय च नमः ।
नम आशुषेणाय च नमः । आशुरथाय च नमः ।
नमः शूराय च नमः । अवभिन्दते च नमः ।
नमो वर्मिणे च नमः । वरूथिने च नमः ।
नमो बिल्मिने च नमः । कवचिने च नमः ।
नमश्श्रुताय च नमः । श्रुतसेनाय च नमः ।
नमो दुन्दुभ्याय च नमः । आहनन्याय च नमः ।
नमो धृष्णवे च नमः । प्रमृशाय च नमः ।
नमो दूताय च नमः । प्रहिताय च नमः ।
नमो निषङ्गिणे च नमः । इषुधिमते च नमः ।
नमस्तीक्ष्णेषवे च नमः । आयुधिने च नमः ।
नमः स्वायुधाय च नमः । सुधन्वने च नमः ।
नमः स्रुत्याय च नमः । पथ्याय च नमः ।
नमः काट्याय च नमः । नीप्याय च नमः ।
नमस्सूद्याय च नमः । सरस्याय च नमः ।
नमो नाद्याय च नमः । वैशन्ताय च नमः ।
नमः कूप्याय च नमः । अवट्याय च नमः ।
नमो वर्ष्याय च नमः । अवर्ष्याय च नमः ।
नमो मेघ्याय च नमः । विद्युत्याय च नमः ।
नम ईध्रियाय च नमः । आतप्याय च नमः ।
नमो वात्याय च नमः । रेष्मियाय च नमः ।
नमो वास्तव्याय च नमः । वास्तुपाय च नमः ।
नमस्सोमाय च नमः । रुद्राय च नमः ।
नमस्ताम्राय च नमः । अरुणाय च नमः ।

नमः शङ्गाय च नमः । पशुपतये च नमः ।
नम उग्राय च नमः । भीमाय च नमः ।
नमो अग्रेवधाय च नमः । दूरेवधाय च नमः ।
नमो हन्त्रे च नमः । हनीयसे च नमः ।
नमो वृक्षेभ्यो नमः । हरिकेशेभ्यो नमः ।
नमस्ताराय नमः । नमश्शंभवे च नमः ।
मयोभवे च नमः । नमश्शंकराय च नमः ।
मयस्कराय च नमः । नमः शिवाय च नमः ।
शिवतराय च नमः । नमस्तीर्थ्याय च नमः ।
कूल्याय च नमः । नमः पार्याय च नमः ।
अवार्याय च नमः । नमः प्रतरणाय च नमः ।
उत्तरणाय च नमः । नम आतार्याय च नमः ।
आलाद्याय च नमः । नमः शष्प्याय च नमः ।
फेन्याय च नमः । नमः सिकत्याय च नमः ।
प्रवाह्याय च नमः ।
नम इरिण्याय च नमः । प्रपथ्याय च नमः ।
नमः कि ँ शिलाय च नमः । क्षयणाय च नमः ।
नमः कपर्दिने च नमः । पुलस्तये च नमः ।
नमो गोष्ठ्याय च नमः । गृह्याय च नमः ।
नमस्तल्प्याय च नमः । गेह्याय च नमः ।
नमः काट्याय च नमः । गह्वरेष्ठाय च नमः ।
नमो ह्रदय्याय च नमः । निवेष्प्याय च नमः ।
नमः पा ँ सव्याय च नमः । रजस्याय च नमः ।
नमः शुष्क्याय च नमः । हरित्याय च नमः ।
नमो लोप्याय च नमः । उलप्याय च नमः ।
नम ऊर्व्याय च नमः । सूर्म्याय च नमः ।
नमः पर्ण्याय च नमः । पर्णशद्याय च नमः ।

नमोपगुरमाणाय च नमः । अभिघ्नते च नमः ।
नम आक्खिदते च नमः । प्रक्खिदते च नमः । वो नमः ।
किरिकेभ्यो नमः । देवाना ँ हृदयेभ्यो नमः ।
नमो विक्षीणकेभ्यो नमः । नमो विचिन्वत्केभ्यो नमः ।
नम आनिर्हतेभ्यो नमः । नम आमीवत्केभ्यो नमः ।

The Sri Rudra trishati is used to perform archana of Sri Rudra (or Shiva).
It is said that this is the
only namavaLi form of addressing the Lord in all of the Vedas. The Sri Rudra Trishati uses the verses of the Sri Rudram in a different form.
It is a part of the mahanyAsam as well. Students of Sri Rudram practice the trishati after mastering the Sri Rudram. The Trishati archana is also done during pradosha worship of Sri Shiva.

Encoded with accent and proofread by
Vaidya Sundaram vaidya_narayanan@yahoo.com
and rechecked by Ajit Krishnan ajit@mudgala.com

.. shrirudratrishati ..
was typeset on August 12, 2016

Please send corrections to *sanskrit@cheerful.com*